Roll No. ...................................

# CD–2112

## B. A. (Part I) EXAMINATION, 2020

**(Old Course)**

SANSKRIT LITERATURE

Paper Second

**(गद्य कथा एवं साहित्येतिहास)**

*Time : Three Hours*

*Maximum Marks : 75*

**सूचना :** सभी प्रश्नों को हल करना अनिवार्य है।

**इकाई—I**

1. अधोलिखित गद्यांशों में से किन्हीं **दो** की सप्रसंग व्याख्या कीजिए— 20

(i) भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणाः। गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य। इतरस्य तु करिण इव शङ्खाभरणमाननशोभासमुदयमधिकतरमुजनयति। हरत्यतिमलिनम् अन्धकारमिव दोषजातं प्रदोषसमयनिशाकर इव। गुरुपदेशः प्रशमहेतुर्वयः परिणाम इव पलितरूपेण शिरसिजजालममलीकुर्वन् गुणरूपेण तदेव परिणमयति।





(ii) मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः न पूजयन्ति द्विजातीन् न मानयन्ति मान्यान् नार्चयन्त्यर्चनीयान् नाभिवादयन्त्यभिवादनार्हान् नाभ्युत्तिष्ठन्ति गुरुन् अनर्थकायासान्तरितविषयोपभोगसुखमित्युपहसन्ति विद्वज्जनम् जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धजनोपदेशम् आत्मप्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय कुप्यन्ति हितवादिने।

(iii) सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान्नवयौवराज्याभिषेकमङ्गलम्। कुलक्रमागतामुद्वह पूर्वपुरुषैरुढांधुरम्। अवनमय द्विषतां शिरांसि। उन्नमय स्ववन्धुवर्गम्। अभिषेकानन्तर च प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम्। अय च ते कालः प्रतापमारोपयितुम्। आरुढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति इत्येतावदभिधायोपशशाम्।

(iv) यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्मं केवलमुद्वमति। तथा हि इयं संवर्धनवारिधारा तृष्णा-विषवल्लीनाम् व्याधगीतिन्द्रियमृगाणाम् परामर्शधूमलेखासच्चरतिचित्राणाम् विभ्रमशय्या मोहदीर्घनिद्राणाम् निवासजीर्णवलभी धनमदपिशाचिकानाम् तिमिरोद्गतिः शास्त्रदृष्टीनाम् पुरःपताका सर्वाविनयानाम्।

## इकाई—II

2. निम्नलिखित में से किन्हीं **दो** पद्यों की व्याख्या कीजिए— 20

(i) नदीनां शस्त्रपाणीनां नखिनां शृ िणां तथा।
विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च

(ii) न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा

(iii) संतोषामृततृप्तानां यत्सुखं शान्तचेतसाम्।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम्

(iv) रोगी चिरप्रवासी परान्नभोजी परावसथशायी।
यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः

## इकाई—III

3. सुवर्णकंकणधारी बूढ़ा बाघ और मुसाफिर की कथा अपने शब्दों में लिखिए। 10

**अथवा**

"बाणोच्छिष्टं जगत्सर्वम्" अपने शब्दों में लिखिए।

## इकाई—IV

4. कथा साहित्य के इतिहास का संक्षिप्त वर्णन कीजिए। 15

**अथवा**

निम्नलिखित में से किन्हीं **दो** पर टिप्पणियाँ लिखिए—

(i) अभिज्ञानशाकुन्तलम्

(ii) मृच्छकटिकम्

(iii) स्वप्नवासवदत्तम्

(iv) प चतन्त्रम्





## इकाई—V

5. निम्नलिखित में से किन्हीं **दो** पर टिप्पणियाँ लिखिए— 10

(i) शिशुपालवधम्

(ii) रघुवंशम्

(iii) किरातार्जुनीयम्

(iv) शिवराजविजयः।